नारदपत्नी । (यथा, महाभारते ।५।११७।१५।
"दमयन्त्यां नलश्चैव सत्यवत्याञ्च नारदः ॥")
ऋचीकमुनिपत्नी । इति मेदिनी ॥ (यथा, हरिवंशे । २७ । १८ ।
"गाधेः कन्या महाभागा नाम्ना सत्यवती शुभा ।
तां गाधिः काव्यपुत्राय ऋचीकाय ददौ प्रभुः ॥"
सत्यविशिष्टे, त्रि ॥ यथा, भागवते ।४।२१।४६।
"पुत्रेण जयते लोकानिति सत्यवती श्रुतिः ।
ब्रह्मदण्डहतः पापो यद्वेणोऽत्यतरत्तमः ॥")
ऋचीकपत्न्याः प्रमाणान्तरं यथा,—
"ब्रह्मपुत्रो भृगुर्नाम ऋचीकस्तत्सुतोऽभवत् ।
स भार्य्यार्थी चरन् भूमौ कान्यकुब्जं गतः पुरा ॥
ददर्श चारण्यगतं जह्नोर्वंशसमुद्भवम् ।
कुशिकस्य सुतं गाधिं तपस्थं नृपसत्तमम् ॥
अरण्यस्थस्य तस्याथ पुत्रकामस्य भूभृतः ।
सभार्य्यस्य सुता जज्ञे देवकन्यासमा गुणैः ॥
ऋचीको भृगुपुत्रस्तां भार्य्यार्थं समयाचत ।
गाधिं नृपतिशार्द्दूलं स चोवाच नृपो मुनिम् ॥
एकतः श्यामकर्णानामश्वानां चन्द्रवर्चसाम् ।
सहस्रमेकं यो दद्यात्तस्मै पुत्रीं प्रतीयते ॥
ऋचीक उवाच ।
दास्याम्यश्वसहस्रन्तु तव राजंस्तथाविधम् ।
कञ्चित्कालं प्रतीक्षस्व यावत्तदहमानये ॥
गङ्गाजलादुत्थितन्तु दत्तं सम्यक् प्रचेतसा ।
आदायाश्वसहस्रं स मुनिर्गाधिमथाभ्ययात् ॥
तानश्वान् गाधिरादाय पुत्रीं सत्यवतीं स्वकाम्
ऋचीकाय ददौ लक्ष्मीं केशवायेव सागरः ॥
ऋचीको गाधितनयां लब्ध्वा भार्य्यामनिन्दिताम्
मुदितः स तया रेमे यथाकामं स्वमाश्रमे ॥
कृतदारं सुतं श्रुत्वा द्रष्टुं पुत्रं स्वकं भृगुः ।
अथाजगाम मतिमान् स्नुषां दृष्ट्वा ननन्द च ॥
दम्पती तं समासीनं भृगुं देवगणार्च्चितम् ।
पूजयित्वा समासीनं तस्थतुस्तौ कृताञ्जली ॥
ततो भृगुः स्नुषां स्वीयां सुप्रीत इदमब्रवीत् ।
वरं वृणीष्व दास्यामि वाञ्छितं वरवर्णिनि ।
अदेयं दुष्करं वापि यत्र ते वर्त्तते स्पृहा ॥
ततः सत्यवती पुत्रं तप आम्नायपारगम् ।
मातुश्च वीरमतुलं पुत्रं वरमयाचत ॥
स चैवमस्त्वित्युक्त्वैव भूत्वा ध्यानपरस्तदा ।
विश्रममावत्य मनसा यत्नात् श्वासं ससर्ज्ज सः ॥
तस्य निःश्वासवातात्तु निःसृतं वै चरुद्वयम् ।
तस्यै तत् द्वितयं दत्त्वा भृगुस्तामिदमब्रवीत् ॥
चरुद्वयं गृहाण त्वं स्नुषे सत्यवति स्वयम् ।
स्नात्वा ऋतौ ऋतौ माता तदा त्वञ्च करिष्यथः ॥
आलिङ्ग्याश्वत्थवृक्षं ते माता पुंसवनाय वै ।
चरुमारक्तकं चमं सा भोक्ष्यति सुतस्ततः ॥
त्वञ्चोडुम्बरवृक्षन्तु समालिङ्ग्य सितं चरुम् ।
भक्षस्व तेन पुत्रस्ते भविष्यति सनातनः ॥
एवमुक्त्वा भृगुर्यातो यथेच्छं सापि संमुदम् ।
अवाप मात्रा सहिता भर्त्रा पित्रा च भाविनी ॥
अथ स्नानदिनेऽश्वत्थमालिङ्ग्यारक्तकं चरुम् ।
अघात् सत्यवती तस्या माता फल्गुं सितं चरुम् ॥ * ॥
परिवर्त्तन्तु तं ज्ञात्वा दिव्यज्ञानो भृगुर्म्मुनिः ।
अथागत्य स्नुषां तान्तु वचनञ्चेदमब्रवीत् ॥
विपर्य्ययस्त्वया भद्रे हृत्वालिङ्गनकर्म्मणि ।
तथा चरुप्राशने च तवेदन्ते भविष्यति ॥
ब्राह्मणः क्षत्त्रियाचारस्तव पुत्रो भविष्यति ।
क्षत्त्रियो ब्राह्मणाचारो मातुस्ते भविता सुतः ॥
इत्युक्त्वा भृगुणा साध्वी तदा सत्यवती भृगुम् ।
पुनः प्रसादयामास पौत्रो मेऽस्त्विति तादृशः ।
एवमस्त्विति प्रोक्त्वा स तत्रैवान्तर्दधे भृगुः ॥
अथ काले सुतं दीप्तं जमदग्निञ्च गाधिजा ।
सुषुवे जननी तस्या विश्वामित्रं तपोधनम् ॥
जमदग्निस्ततो वेदान् चतुरः प्राप मा चिरम् ।
प्रादुरासद्धनुर्व्वेदः स्वयं तस्मिन् महात्मनि ॥
विश्वामित्रोऽपि सकलान् वेदानपि तथाचिरात्
धनुर्व्वेदं तथा कृत्स्नं विप्रश्चाभूत्तपोधनः ॥
जाज्वल्यमानस्तेजस्वी जमदग्निर्म्महातपाः ।
वेदैस्तपोभिः स मुनीनत्यक्रामच्च सूर्य्यवत् ॥"
इति श्रीकालिकापुराणे जामदग्न्योपाख्याने ८४ अध्यायः ॥
सत्यवतीसुतः, पुं, (सत्यवत्याः सुतः । ) व्यासः । इति शब्दरत्नावली ॥ ( यथा, महाभारते । १ । १५७ । १२ ।
"एवं स तान् समाश्वास्य व्यासः सत्यवतीसुतः ।
एकचक्रामभिगतः कुन्तीमाश्वासयत् प्रभुः ॥"
जमदग्निः । इति पुराणम् ॥)
सत्यवाक्, [च्] पुं, (सत्या वाक् यस्य ।) ऋषिः । इति शब्दरत्नावली ॥ (कश्यपपत्न्या मुनेः पुत्रविशेषः । यथा, महाभारते । १ । ६५ । ४३ ।
"सत्यवागर्कपर्णश्च प्रयुतश्चापि विश्रुतः ॥" )
काकः । इति त्रिकाण्डशेषः ॥ (सावर्णमनुपुत्त्रविशेषः । यथा, मार्कण्डेये । ८० । ११ ।
"विरजाश्चार्व्ववीरश्च निर्म्मोहः सत्यवाक् कृतिः ।
विष्ण्वाद्याश्चैव तनयाः सावर्णस्य मनोर्नृपाः ॥")
सत्यवादिनि, त्रि ॥ ( यथा, रामायणे । २ । २८ । ११ ।
"कालश्चायं समुत्पन्नः सत्यवाग् भवतु द्विजः ॥")
सत्यवादी, [ न् ] त्रि, (सत्यं वदतीति । वद् + णिनिः ।) यथार्थवक्ता । तत्पर्य्यायः । सत्योद्यः २ । इति शब्दमाला ॥ (यथा, महानिर्व्वाणतन्त्रे । ३ । ८८ ।
"अस्मिन् धर्म्मे महेशि ! स्यात् सत्यवादी जितेन्द्रियः ।
परोपकारनिरतो निर्व्विकारः सदाशयः ॥")
सत्यवान्, [ त् ] पुं, ( सत्यमस्यास्तीति । सत्य + मतुप् । मस्य वः ।) राजविशेषः । स तु सावित्रीपतिः । इति मेदिनी ॥ ( अस्य नामनिरुक्तिर्यथा, महाभारते । ३ । २९३ । १२ ।
"सत्यं वदत्यस्य पिता सत्यं माता प्रभाषते ।
ततोऽस्य ब्राह्मणाश्चक्रुर्नामैतत् सत्यवानिति ॥"
अस्य विशेषवृत्तान्तस्तु तत्रैव २९२ अध्यायमारभ्य द्रष्टव्यः ॥ * ॥ चाक्षुषमनुपुत्त्रविशेषः । यथा, भागवते । ४ । १३ । १६ ।
"स चक्षुः सुतमाकूत्यां पत्न्यां मनुमवाप ह ।
मनोरसूत महिषी विरजान्नड्वला सुतान् ।
पुरुं कुत्समृतं द्युम्नं सत्यवन्तं ऋतं व्रतम् ॥")
सत्यवति, त्रि ॥ ( यथा, महाभारते । १३ । ७५ । ३४ ।
"सत्यवन्तः स्वर्गलोके मोदन्ते भरतर्षभ ॥")
सत्यवृत्तः, त्रि, (सत्यं वृत्तं यस्य । ) सत्यवादी । इति केचित् ॥ ( सच्चरित्रे क्ली । यथा, महाभारते । १३ । ७३ । ११ ।
"यावज्जीवं सत्यवृत्ते रतश्च
दाने रतो यः क्षमी चापराधे ॥")
सत्यव्रतः, पुं, (सत्यमेव व्रतं यस्य । ) त्रेतायुगे सूर्य्यवंशीयपञ्चविंशराजः । यथा,—
"त्रिधन्वनः सुतो जातस्त्रय्यारुण इति स्मृतः ।
तस्य सत्यव्रतो नाम तस्मात् सत्यरतः स्मृतः ॥"
इति मात्स्ये १२ अध्यायः ॥
स च त्रिशङ्कुराजः । यथा,—
"त्रिधन्वनस्त्रय्यारुणस्त्रय्यारुणात् सत्यव्रतः । योऽसौ त्रिशङ्कुसंज्ञामवाप चाण्डालतामुपगतश्च द्वादशवार्षिक्यामनावृष्ट्यां विश्वामित्रस्य कलत्रापत्यपोषणार्थं चाण्डालपरिग्रहपरिहरणार्थञ्च जाह्नवीतीरे न्यग्रोधे मृगमांसमनुदिनं बबन्ध । परितुष्टेन च विश्वामित्रेण सशरीरः स्वर्गं आरोपितः । त्रिशङ्कोर्हरिश्चन्द्रः ।" इतिविष्णुपुराणे ४ अंशे २ अध्यायः ॥ ( धृतराष्ट्रस्य पुत्त्रविशेषः । यथा, महाभारते ।१।६३।११७ ।
"जयः सत्यव्रतश्चैव पुरुमित्रश्च भारत ॥"
महादेवः । इति महाभारतम् ।१३।१७।१५०॥
सत्यरूपव्रते, क्ली । यथा, रामायणे ।२।२६।३७।
"सा त्वं वसेह कल्याणि राज्ञः समनुवर्त्तिनी ।
भरतस्य रता धर्म्मे सत्यव्रतपरायणा ॥"
सत्यव्रतविशिष्टे, त्रि । यथा, हरिवंशे ।३१।५८।
"एतेऽहि वंशजाः सर्व्वे राजानः कीर्त्तिता मया ।
सत्यव्रता महात्मानः प्रजावन्तो महारथाः ॥")
सत्यसङ्काशः, त्रि, ( सत्यस्य सङ्काशः सदृशः । ) सत्यसन्निभः । इति केचित् ॥
सत्यसङ्गरः, पुं, (सत्यः सङ्गरः प्रतिज्ञा युद्धं वा यस्य ।) कुवेरः । इति त्रिकाण्डशेषः ॥ अन्यायरहितयुद्धश्च ॥ ( ऋषिविशेषः । इति महाभारतम् । २ । ७ । १५ ॥ )
सत्यसन्धः, पुं, (सत्य सन्धा अभिसन्धिर्यस्य । ) रामानुजभरतः, । जनमेजयः । इति शब्दरत्नावली ॥ ( विष्णुः । इति महाभारतम् । १३ । १४९ । ६७ ॥ धृतराष्ट्रपुत्त्रः । इति च महाभारतम् । १ । ११७ । ८ ॥) सत्यप्रतिज्ञे, त्रि ॥ यथा,—
"राजेन्द्रं सत्यसन्धं दशरथतनयं श्यामलं शान्तमूर्त्तिं